# 108 Names of Srī Dakṣiṇāmūrti
## With the Gloss Tattva Prakāśikā



By Swami Tattvavidananda Saraswati
Translated into English by Puppala B.




**108 Names of śrī Dakṣiṇāmūrti**
With the Gloss Tattva Prakāśikā

३१। ओं वनवाससमुल्लासाय नमः।
वने वासः तस्मिन् सम्यक् उल्लासः उत्साहः यस्य सः। तस्मै नमः।
परमेश्वरः दक्षिणामूर्त्यवतारे वटवृक्षस्य मूले महर्षिभिः परिवारित आस्ते। एतद्दृश्यं कस्यान्चिनकर्यां बभूवेति न युक्तम्। एतदरण्यपरिसरस्य सदृशं दृश्यं खलु। अपि च यत्र ग्राम्यभोगानुरक्तिः स ग्रामः यत्र शास्त्रश्रवणादि अभ्यस्यते तपस्संधीयते तदरण्यमिति च वेदान्तिनां परिभाषा। तथाच ब्रह्मसंसदेव वनम्। तस्मिन् भगवान् सदा स्वीयसन्निधिं विधत्ते।

Salutations to the One who revels (in himself) living in the forest.

Dakṣiṇāmūrti as an incarnation of the Lord sits under a banyan tree surrounded by great sages. It is not appropriate to assume that this scene belongs to some urban surroundings. This is indeed a scene resembling the surroundings of a forest. In the terminology of Vedāntins, it is said to be village where there is a passion for sense pursuits; it is said tobe forest where one is engaged in listening to the scriptures (from *guru),* or where one is committed to contemplation. Thus a forest is a place of assembly of those who seek *Brahman.* There the Lord always grants his sacred presence to the devotees.

३२। ओं वनवीरैकलोलुपाय नमः।
वनेषु वीराः किरातादयो वनवासिनः। तेषु एकलोलुपः अत्यन्तमासक्तः। तस्मै नमः।
भगवान् शिवः अर्जुनस्य परीक्षार्थं किराततरूपेणावतीर्य किरातस्त्रीरूपेणावतीर्णया पार्वत्य सह वने विचचारेति पुराणगथा प्रसिद्धा। वनं तपसः संसारनिवृत्तेश्च उपलक्षणं भवति। तपस्शालिषु सर्वकर्मसन्न्यासपूर्वकज्ञाननिष्ठापरायणेषु च भगवान् अतिशयेन वत्सल इति च विदितमेव भक्तजनानाम्।

Salutations to the One who ardently longs for forest dwellers.